# Rashtradhvajagitam

# राष्ट्रध्वजगीतम्

## Document Information

Text title : Rashtradhvajagitam

File name : rAShTradhvajagItam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# राष्ट्रध्वजगीतम्

(गीतिका) (मात्रासमक जाति)
जयति त्रिवर्णै गुणगणपूर्णै
जगति समिद्ध सुषमाऽऽकीर्णम् ।
स्नेह-सौख्य-रस गौरव-मानं
धृति-मति शक्ति-सुधौघ-निधानम् ॥ जयति० ॥

विश्व शान्ति हित-कृत सन्देश
भ्रातृभाव समतैक निदेशम् ।
चारु चरित कृत-जन-सन्तोषं
आधि-व्याधि भय-शोषण शोषम् ॥ जयति० ॥

वीर केतुरयमुच्छ्रिन-दण्ड
शौर्य प्रधर्षित रिपु दल खण्ड ।
शत्रु सैन्य दलनेन प्रचण्ड
क्रान्तिकारि चरितामृत चण्ड ॥ जयति० ॥

ध्वजमिममुन्नय, मातरमर्चय,
अञ्जय देशहितार्पित-जीवम् ।
भञ्जय शत्रु, रञ्जय मित्र
मण्डय देश, खण्डय द्वेषम् ॥ जयति० ॥

कैसर श्वेत-हरित-गुणपूर्णै
वर्णैर्भ्राजित-रुचिर-सुशोभम् ।
कैसर-वर्णित त्याग-तपोबल
शौर्य धैर्य-गरिमोच्चय-पूर्णम् ॥ जयति० ॥

श्वेत-वर्ण-धृत-शम-सन्तोष
सत्य-अहिंसा-शान्ति-गुणौघम् ।
हरित-वर्ण-श्रित-वैभव भावं

उन्नति-प्रगति विकास गुणाढ्यम् ॥ जयति० ॥

धर्म-चक्र-संसूचित धर्मं
धर्मं-नय धर्मार्पित देहम् ।
प्रगति-सूचक चक्रमिदं ते
सूर्य-चक्रमिव हास विकासम् ॥ जयति० ॥

लोक-हिताय जगद्धित हैतो
भ्रातृभाव समता-सुख-हेतो ।
प्रगति विकास-समुन्नति-हेतो
विलसेद् राष्ट्रध्वज सुख सेतु ॥ जयति० ॥

क्रान्तिकारिभिर्जीवन-दानैः
शान्ति-पथैः सर्वस्व प्रदानैः ।
वीर धीर-जन-जीवन त्यागैः,
अर्चितमेतत् प्रतिपल रम्यम् ॥ जयति० ॥

क्रान्ति शौर्य धृति-जीवन-दान
शिक्षय लोक, शोषय शोकम् ।
षष्टि-कोटि-जय-नाद-समुर्त्यम् ।
विहरेद् विलसेद् गौरव-पूर्णम् ॥ जयति० ॥

Proofread by Mandar Mali

*Rashtradhvajagitam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*